१
7

महिम्नस्तोत्रप्रारम्भ।

श्रीगणेशाय नमः ॥ ॐ नमः श्रीशंकराय नमः ॥ हे भगवन् तव महिम्नः परं पारं अविदुषः पुंसः अजानतः पुरुष
स्य स्तुतिर्यदि असदृशी स्यात् अननुरूपा अयोग्या भवेत् तर्हि ब्रह्मादीनामपि गिरः त्वयि विषये अवसन्ना
भवेयुः निःफला भवन्ति नतस्मात्कारणात् न केवलमस्माकमेव स्तुतौ नैवाधिकारित्वं प्रतिब्र ह्मादेरपि
तथैव स्यादित्यर्थः । एतेन पूर्वार्द्धेन स्तुतेर्नैवाधिकारित्वं प्रत्यपादि ॥ उत्तरार्द्धेन साधिकारित्वं प्रतिपाद्यते

महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ॥ अथा ॥श॥
॥१॥ वाच्यः सर्वः स्वमतिपरिणामावधि गृणन्ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥१॥

टी० ॥ हे भगवन् अपि च सर्वोऽपि जनः सर्वः स्वमत्यापि जनः स्वमतिपरिणामावधि स्वकीया मतिस्तस्याः
परिणामः परिपाकः तस्यावधिः सीमा सामर्थ्यादापर्यन्तं स्वमतिपरिणामावधिपर्यन्तं भवति एवं त्वां गृणन्
स्तुवन् अवाच्योऽनुपालंभ्यो भवतीति निश्चयः ॥ यदेवं तर्हि हे हर हे दीनार्त्तिहर अस्मिन् स्तोत्रे मम एष अपरिकरः
प्रारम्भो निरपवादो [illegible] मतान्स्ववाक्य मनस्व

भवावतोऽशेषशास्त्रकर्तृत्वं प्रतिपादनाय आत्मन औद्धत्यपरिहाराय स्तुवन्नाह। मधु इति हे भगवन् मम स्तुत्या तव
तुष्टिर्भविष्यत्येव। किं कस्मात् तव वाचो गिरो निर्मितवतः। सृष्टवतः। कथंभूताः वाचः मधुस्फीताः कोमला माधुर्यगुणा
युक्ताः सालंकारा इत्यर्थः। पुनः कथंभूताः परममृतं परमामृतस्वरूपाः। पर... मामृतस्वरूपाश्च योच्यन्ते॥ उप
चारा वेदान्तादि आत्मनिष्ठाः। एतेन किमुक्तं एवंविधाः स्वर्गापवर्गयोर्निष्ठा वाचो गिरो निर्मितवतः॥ सुरगुरो

॥४॥ मधुस्फीता वाचः परममृतं निर्मितवतस्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम्॥
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता॥३॥ ॥२॥

रपि वाक् किं तव विस्मयपदं भवति। आश्चर्यस्थानं भवति॥ अपि तु न भवतीत्यर्थः॥ किं पुनरस्मदादेः॥ अहो यद्ये
वं तर्हि किमर्थं स्तुतो भवतीति। सत्यं तु पुनः॥ हे पुरमथन हे त्रिपुरदहन अस्मिन् स्तुतिलक्षणेऽर्थे मम बुद्धिरिति
कारणाद्व्यवसिता॥ कृतोद्यमा। इतीति किम्। अहं भवतो गुणकथनपुण्येन एतां मामकीयां वाणीं पुनामि पवि
त्रीकरोमि॥३॥

ध्यानतत् अतत् अतद्रूपा वासौ व्यावृत्तेप्रत्व अतद्व्यावृत्तिलक्षणा अतद्व्यावृत्त्या३

वाङ्मनसे[illegible] नयोः वाङ्मनसयोः इति च किं च वाङ्मनसे सर्वार्थविषयिरिणी। ताभ्यामपि सर्वमहिमा अवधारयितुं परिज्ञातुं न शक्य
ते॥ न च प्रत्यक्षेण न अनुमानेन गृह्यते। स्वकः यं तव महिमानं श्रुतिरपि वेदोपि चकितमभिधत्ते भीमभावो भूते। न निश्चयतः कथमा
अतद्व्यावृत्त्यैव भूतो महिमा कस्य स्तोतव्यः। अपि तु न कस्यापीत्यर्थः॥ तथा कतिविधगुणास्तस्य भगवतः किंप्रतीपा

अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि॥
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः॥२॥

णाः ते परिज्ञातुं न शक्यन्ते कस्य विषयः कस्य गोचरो भवेत् अपि तु न कस्यापीत्यर्थः॥ एतेन निःफलस्वरूपेण स्तुते रन
धिकारित्वं प्रतिपादितं ध्रुवं फलस्य वक्ताशक्तं प्रतिपाद्य फलमाह। तु पुनः अर्वाचीने दृष्टिस्थितिप्रलयस्वरूपे पदे
स्थाने कस्य मनो न पतति वा चो वा कस्य न प्रसरन्ति अपि तु सर्वेषामपि वाचश्च प्रसरन्ति॥२॥

इदानीं तामेव व्याख्यां धियं प्रकटयन्नाह ॥ खलु निश्चितं स धाता स कर्त्ता त्रिभुवनं सृजति त्रिभुवनं अनेकाद्भुताकाचेष्टा या
परिस्पन्दनं क्रिया तया किंकायः सन् त्रिभुवनं सृजति ॥ तथा किमुपायः स धाता किमुपायः सन् त्रिभुवनं किमुपा
दानं किंकारणं किंनिमित्तं ॥ अयमतिकुतर्कः कांश्चित् इतश्चियो मन्दमतीन् मुखरयति । वाचालयति किम

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादानमिति च ।
॥३॥ अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥५॥ ॥३॥

यं जगतो मोहाय विप्रतारणाय नरकगमनाय च । कथंभूतः कुतर्कः त्वयि विषये । अनवसरदुःस्थोऽदुर्बलः इति किं
भूतेऽपि अतर्क्यैश्वर्ये । अचिन्त्यमहत्त्वे परमेश्वरे इच्छयापि कृते देहमिच्छया वितनुर्भवेत् ॥ कोऽस्ति भ
गवांल्लोके वाचकी इनकेरिव ॥५॥

आत्मनस्तु ते स्वरूपकामत्वं अव्यभिचारि तं प्रतिपाद्य इदानीं सर्वेश्वरत्वं सर्वकर्तृत्वं प्रति केचिद् विप्रतिपाद्य
न्ते॥ मीमांसकादयस्तन्मतनिराकरणाय अनेन पद्येन मायोपन्यासपरं शापूर्वोक्तं पुराणभागवतं स्तुवन्नि
त्याह॥ हे भगवन् हे वरद यत् त्वं ते पवनदेव अन्धकारं निःक्षिप्य आरोपितं च। कास्तु ते स्तुतं च ते कथंभू
ताः गुणाभिन्नाः सुगुणाः सत्त्वरजस्तमांसि तैर्भिन्नाः स्वयंभूता गुणाभिन्नास्तु॥ कथंभूतं तवैश्व

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत् त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु॥
अभव्यानामस्मिन् वरद रमणीयामरमणीं विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः॥ ४॥

र्यं जगदुदयरक्षाप्रलयकृत् त्रयाणां जगतां उदय उत्पत्तिः रक्षा परिपालनं प्रलयो विनाशस्तेषां कर्त्ता भगवान् करोतीति पुनः
कथंभूतं त्रयीवस्तु त्रयीभिर्वेदैर्वेद्यं। अथवा ब्रह्मविष्णुरुद्रात्मकं रूपं। हे भगवन् इह मर्त्यलोके एके जडधि
यो मन्दमतयः पापिष्ठा मीमांसकादयस्तवैश्वर्यं स्वकोपितं निराकर्तुं व्याक्रोशीं निन्दां विदधति कुर्वन्ति कथं
भूतां व्याक्रोशीं अभव्यानां पापिष्ठानां रमणीयां मनोहरां पुनः कथंभूतां अस्मिन् सर्वज्ञादिगुणो
पेते तवैश्वर्ये अरमणीयाम्॥ ४॥

महिम्नस्तोत्रम्॰

त्रयी वेदविहितो मार्गः सांख्यं कापिलं शास्त्रं पञ्चविंशतितत्त्वोपलक्षितं पातञ्जलयोगः क्लेशवधः। तस्य ध्यानतात्पर्यमाहुर्वैशेषिकशास्त्रे॥ तथा पशुपतिमतं शम्भुना तत्र सिद्धान्ताः पदार्थाः निरूपिताः। सोमसिद्धान्तादि वक्ष्यति। नाके लक्षितं तत्पञ्चाध्यायीसिद्धान्तात्म्यायते॥ तथा वैष्णवं केशवपञ्चरात्रं च नारदपञ्चरात्रं पाञ्चरात्रम्। इति प्रस्थानं समाप्तौ वर्तते। एतत्पञ्चसंख्यापरिच्छिन्नप्रस्थानं एतस्मिन्प्रस्थाने प्रभिन्ने

॥७॥ त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च। ॥७॥
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥७॥

4 सति पथ्यं मार्गे सति अहंकारोपेताः मदनुयायिन इति वदन्ते॥ यत इदं परं तत्त्वं न आत्यन्तरं [illegible]। अदः पथ्यं ग्राह्यं च॥ तस्मात् सेवनीयमस्ति। कस्मात् रुचीनां वैचित्र्यात्। रुचयो विचित्राः यद्वा तं एकमेव परं तत्त्वमभिन्नं प्रत्यक्षतः॥ तदेव रुचीनां वैचित्र्या [illegible]। ऋजुकुटिलनाना पथजुषां पयसाम्। एकोऽसि वा यथा गम्यस्त्वमसि ॥७॥

हे भगवन् अमी भूर्भुवःस्वःप्रभृतयः सप्तलोकाः अवयववन्तोपि अजन्मानः एषां जन्म न विद्यते यथा सावयवं न लक्ष्ण मेघजं यथा घटः। तथा लोकाः सावयवाः सावयवत्वाज्जन्मवन्त एव। हे भगवन् भवद्विधिः सृष्टिविधानं जगतां अधिष्ठातारं चेतनं निमित्तकारणं ईश्वरं किं अनादृत्य भवति। अनपेक्ष्य भवति। नैव कर्त्तारमपेक्षते। एवं दिक्कालधर्माधर्मपरमाण्वादिप्रभृतीनि चेतनाधिष्ठानान्यानि चेतनाधिष्ठानस्वीकृतानि स्वकार्येषु प्रवर्त्त

अजन्मानो लोकाः किमवयववन्तोपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति।
अनीशो वा कुर्याद्भुवनजनने कः परिकरो यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे॥६॥

न्ते। स्वचेतनाधिष्ठानस्वीकृतकार्येषु लोके प्रवर्त्तन्ते। अथ पुनरभिधीयते वा यदि अनीशः कुर्यात् महदैश्वर्य वहिर्भूतः कश्चित्कुर्यात्तदा तस्य अनीशस्य भुवनजनने भुवनोत्पादने विधौ कः परिकरः का सामग्री॥ हे अमरवर यतः कारणादिमे मन्दाः पापिष्ठा मीमांसकादयस्त्वां प्रति संशेरते। संदेहं कुर्वन्ति। त्वां प्रति संदेहो नास्तीति तात्पर्यार्थः॥६॥

हे भगवन् हे पुरमथन कश्चिन्मद्दृष्टीनानुपायी सकलं समस्तं जगदिदं ध्रुवं गदति । अविनश्वरं कथयति । अथापरो बौद्धः दंभः क्षणभंगवादी सकलं जगदिदं अध्रुवं क्षणिकं गदति । हे भगवन् । एतस्मिन् समस्तेऽपि जगति व्यस्त विषयेऽपि सति विभिन्नप्रमाणभूमौ सत्यां अहं तैर्भेदवादिभिर्विस्मित इव विस्मितोत्पन्नमोहप्रापित इव त्वां

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ॥ ।५॥ ।६॥
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा
मुखरता ॥८॥

स्तुवन् जिह्रेमि लज्जां अहो प्राप्नोमि तर्हि । कथं स्तुतौ प्रवर्त्तसे ॥ सत्यमिदं नन्वहो खलु निश्चयेन ननु मुखरता न वाचालता धृष्टा अपि तु धृष्टैव ॥८॥

महोत्सव इति। देवदेहनवपत् तत्रोपकरणां मात्रापि देहगेहयोर्यां इयत्तास्ति। महानुत्सवो महोत्सवो दम्भः
[illegible] खट्वाङ्गं प्रसिद्धमेव। अपरदण्डस्योपरि शिरःकपालं खट्वा-
ङ्गं कथ्यते। न व्यापारः शुष्कवृक्षविशेषः। अजिनं गजचर्म तथा भस्म च देहे गोमयोत्थं आच्छादनं। काद्रवेया नागाः
तथा कपालं च इति प्रसिद्धः। समाप्तोऽवलम्बनं तत्तु पुनः सुरेखाः। भवद्भ्रूप्रणिहितां भवद्भ्रूपोपनीतां अनिर्वचनीयां

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः कपालं चेतीयत्तव वरद तन्त्रोपकरणम्। सुरास्तां तामृद्धिं
दधति तु भवद्भ्रूप्रणिहितां न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति॥८॥ ॥ ॥

अहिं स्थिति धारयन्ति अहो ये पर्वतं लोकेषु सर्पेन भुक्ते नैवं पायं हि यस्मात्कारणात् विषयमृगतृष्णास्वात्मा-
रामं ब्रह्मं योगिनं न भ्रमयति न चोच्छ्रयति फलेन भगवन्तः परमयोगित्वं प्रकटितम्॥९॥ ॥ ॥ ॥

हे भगवन् दशास्योसुरवरः बाहून् अभ्रंत धृतवान् कथंभूतान् बाहून् रणाकण्डूपरवशान् संग्रामव्यग्रान् किंकेवा
अवैरिव्यतिकरं निःकंटकं त्रिभुवनं अयत्नोपासाद्य प्राप्य हे त्रिपुरदहन दर्दंतान् स्थिरायास्त्वद्भक्तेर्वि स्फूर्जि
तं विलसितं कथंभूता यास्त्वद्भक्तेः शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः शिरांस्येव पद्मानि तेषां श्रे

॥६॥ अयत्नादासाद्य त्रिभुवनमवैरिव्यतिकरं दशास्यो यद्बाहूनभृत रणकण्डूपरवशान्। ॥६॥
शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जि
तमिदम्॥११॥

6

शीर्षंकितः नजार चितः आरोपितचरणांभोरुहबलिः पूजोपहारो यस्याः सा शिरःपद्मश्रेणीरचितचरणांभो
रुहबलिः सा तस्याः॥११॥

हे भगवन् विरंचिर्ब्रह्मा उपरि तन्नपद्मो हरिः कृष्णः अधःपद्दो तवैश्वर्यं यत्नात् परिच्छेत्तुं परिकलयितुं अनलं यातौ असम
र्थौ भूतौ। कथंभूतस्य तव अनिलस्कन्धवपुषः॥ अस्य एतेन किमुक्तम्। वायुतत्त्वपर्यन्तं लिङ्गं समस्तकं का
लाग्निपर्यन्तं लिङ्गं समूलं। अहनाराद्यवाप्तिः विष्णुर्भगवान् अप्तत्वऽनयासौ कथमतो तवैश्वर्यं परिच्छेत्तुं
समर्थौ स्यातामिति अपि तु न भवतः इत्यर्थः॥ ततोऽनन्तरं तेन भगवता ताभ्यां ब्रह्मविष्णुभ्यां स्वयं तस्थे आ

तवैश्वर्यं यत्नाद्यदुपरि विरंचिर्हरिरधः परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः॥ ततो
भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति॥१०॥

त्मानमात्मनैव प्रकटयामास॥ किंकृद्भ्यां भक्तिश्रद्धाभरगुरुरूपथापरं गृणद्भ्यां य यस्मात्कारणात् भगवान्
कारुणिकः कारुणिकत्वात् स्वयं तस्थे आत्मानमात्मनैव प्रकटयामास हे गिरिश प्रक्रमेतत् अनुवृत्ते
र्न व सेवा किं न फलति। अपि तु फलत्येवेत्यर्थः संगच्छते॥१०॥

हे वरद यद्वा यो वा बाणासुरः सुत्राम्णो इन्द्रस्य श्रि‍ यं अधश्चक्रे । कथंभूतां श्रियं परमोच्चैरपि सतीं अत्यन्तमहतीमपि
॥ हे भगवन् । तस्मिन् बाणे तत् न चित्रं नाश्चर्यम् ॥ कथंभूतो बाणः परिजनविधेयत्रिभुवनः । एतद्द्वयोर्बाणरावणयो
र्मध्ये पश्चात्तिद्दिष्टं कथंभूते बाणे त्वच्चरणयोर्वरिवसितरि ॥ त्वच्चरणयोः पूजयितरि हे भगवन् ॥ उक्तमेतत् त्वयि शिर
सः अवनतिः शिरोनमनं कस्यापि उन्नत्यै न भवति ॥ अपि तु सर्वेषामेव हि श्रेयसे भवति ॥ हे त्रिनयन यः कल्माषः

।७। यद्ध्रिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ॥ न तच्चित्रं तस्मिन्
वरिवसितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३॥ अकाण्डब्रह्माण्डक्ष ॥७॥
यचकितदेवासुरकृपाविधेयस्याक्षिर्यत्त्रिनयनविषं संहृतवतः ॥ स कल्माषः कण्ठे तव न कुरुते
न श्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥१४॥
कल्पान्तरे एवं सः विषं संहृतवतः तव कण्ठे आसीत् स कल्माषः कण्ठे श्रियं न कुरुते । अपि तु कण्ठे श्रिया कथंभूतस्य
तव अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्य अकाण्डे अप्रस्तावे प्रलयकालादन्यकाले जगत्क्षयेण जगत्क्षयेन
चकिता भीता देवा असुराश्च तेषां कृपाविधेयेन तस्य अपि उक्तमेतत् भुवनभयभङ्गव्यसनिनः प्रहृष्टस्यापि विकार

हे भगवन् अमुष्य रावणस्य त्वदधिवसतो कैलाशोपि भुजवनं विक्रमपतः पातालेपि प्रतिष्ठा अलभ्या आसी
त् अप्राप्य बभूव । कस्मात्कैलासात् ॥ कथंभूतं भुजवनं । त्वत्सेवा समधिगतसारं आप्तलभ्यम् । कसति लीपिश्र
लक्ष्मचलितांगुष्ठशिरसि सति मन्दचलितांगुष्ठशिरसि सति ॥ अहो प्रक्रमेनतत् । ध्रुवं निश्चितं खलो उन्नी

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलाशेपि त्वदधिवसतो विक्रमपतः ।
अलभ्या पातालेपि अलसचलितांगुष्ठशिरसि प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्य
ति खलः ॥ १२ ॥

तः उपचितः सन् पर्यालब्ध्या असंक्षतः सन् मुह्यति । मोहमुपगच्छति ॥ १२ ॥

महिम्नस्तोत्रम्

अनिभृतजटाताडिततया। ननु। अहो उक्तमेतत् यतो विभुना वामेन वैपरीत्यं विभुत्वं। यद्यपि हे भगवन् यो वारां पात्तीयानं प्रवाहः ते तव शिरसि पृषतलघुदृष्टः। जलकणिकावत् सूक्ष्मो दृष्टः॥ कथंभूतो वियद्व्यापी व्योमप्रवर्द्धनशीलः पुनः कथंभूतः॥ तारागणगुणितफेनोद्गमरुचिः॥ ताराः नक्षत्राणि तेषां समूहः॥ तेन गुणिता उपमिता फेनोद्गमरुचिर्यस्य सः॥ तेन प्रवाहेन जगद्द्वीपाकारं जलधिवलयं कृतम्। समुद्रपरिखं च विहितं। हे धृतमहिम इति। अमुना प्रकारेण। अनेनैव दृष्टान्तेन तव वपुः उन्नेयं अनुमापनीयम्॥ कथंभूतं वपुः। दिव्यं दिव्यप्रभावयुक्तम्॥

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः॥ प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते॥ जगद्द्वीपा
॥१८॥ काकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः॥१७॥ रथः क्षोणी
8 यन्ता शतधृतिरगेन्द्रो धनुरथो रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति॥ दिधक्षोस्ते
कोऽयं त्रिपुरतृणमाडम्बरविधिर्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः॥१८॥

हे भगवन् ते तव त्रिपुरतृणं दिधक्षोः कोऽयं आडम्बरविधिः ... सामग्री इत्याह क्षोणी पृथ्वी रथः। यन्ता सारथिः शतधृतिः ब्रह्मा अगेन्द्रः पर्वतराजो हिमालयः धनुः॥ अथो अनन्तरं रथाङ्गे चक्रस्थाने चन्द्रार्कौ रथचरणपा

हे भगवन् यस्य स्मरस्य बाणाः सदेवासुरनरे जगति असिद्धार्थाः अकृतप्रयोजनाः क्वचिदपि नैव निवर्तन्ते स स्मरः त्वामितरसुर
साधारणं यथा भवति अन्यदेवतुल्यं पश्यन् स्मर्तव्या[त्मा]सीत् अभूत् स्मरणीयशरीरो बभूव कथंभूताः विशिखाः
नित्यं जयिनः जयशीलाः अहो युक्तमेतत् वशिषु जितेन्द्रियेषु परिभवो न पथ्यः न सुखकारी इत्यर्थः ॥१५॥ हे भगवन्

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ॥ स पश्यन्नी
श त्वामितरसुरसाधारणमभूत्स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥१५॥ मही पा
दाघाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ॥ मुहुर्द्यौर्दौ
स्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥१६॥ ॥

हे जगद्रक्षायै नटसि नृत्यं करोषि जगतां रक्षणाय रक्षासंपादनाय नटसि नृत्यं करोषि पुनर्मही पृथ्वी पादा
घातात् पादप्रक्षेपणात् चरणविन्यासात् सहसा संशयपदं व्रजति किं स्थास्यति किमधः प्रविशति इति संशयपदं
तथा विष्णोः पदं आकाशं भ्राम्यद्भुजपरिघरुग्णग्रहगणं यस्मिन् तत् भ्राम्यद्भुजपरिघैः रुग्णा भग्ना ग्रहगणानां
समूहा वर्तन्ते तथा द्यौः स्वर्गः मुहुर्वारंवारं दौस्थ्यं याति दुःस्थतां याति कथंभूता द्यौः

[illegible]

तथा क्रतुपतिः तनुभृतां अधीशः तथा ऋषीणां आर्त्विज्यं आर्त्विज्यभावः ते प्रसिद्धाः सुरगणाः देवसमूहाः सदस्याः सभ्याः एवं साम
ग्रीकस्य क्रतोस्तव सकाशात् क्रतुभ्रंशोऽभूत् यागविनाशो बभूव कथंभूतात्त्वत्तः क्रतुफलदानव्य
सनिनः ॥ हि यस्मात्कारणात् क्रमेण तत् ध्रुवं निश्चितं मखा यागाः कर्तुर्यजमानस्य श्रद्धाया रहितम् अभिचा
राय भवन्ति विपरीतफलाय भवन्ति ॥२१॥ हे नाथ हे स्वामिन् तव मृगव्याधरभसः आखेटकोत्साहः अद्यप

॥१७॥ क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ॥ क्रतु
भ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥ ॥१७॥
प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ॥ धनुः
पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२॥

नाद्यापि त्यजति न त्यजति कथंभूतस्य तव धनुःपाणेः कथंभूतं प्रजानाथं प्रसभं बलात्कारेण रोहिद्भूतां रोहिणी
भूतां स्वां दुहितरं प्रति अभ्यपद्यत ऋष्यवपुषा मृगशरीररूपेण तम् किं कर्तुमिच्छन्तं रिरंसुं रमयितुमिच्छन्तं पुनः कथंभूतं अभिकं
कामुकं अपरं कथंभूतं सपत्राकृतं बाणाभिघातेन पीडितं अपरं कथंभूतं त्रसन्तं दिवमपि यातम् । अद्यापि त्रसन्तं दिवम

प्रभुर्यदिच्छति तत्करोतीति तात्पर्यार्थः ॥१८॥ हे भगवन् हरिः कृष्णः ते तव पादयोः साहस्रं कमलबलिं आधाय यस्य पि तस्मिन्
साहस्रे एकोने सति निजं नेत्रकमलं उदहरत् उत्पाटितवान् असौ भक्त्युद्रेकः परिणतिं गतः सन् त्रयाणां जगतां र
क्षायै जागर्ति स्फुरति केन चक्रवपुषा चक्रशरीरेण ॥१९॥ हे भगवन् जनो लोकः अतः कारणात् कर्मसु विषयेषु दृ
ढपरिकरो नारं भो वर्तते श्रुतौ वेदे श्रद्धां बध्वा पुनः किं कृत्वा क्रतुषु यागेषु फलं प्रतिदानं प्रति भुवं त्वां संप्रेक्ष्य क्रतौ

हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ॥ गतो भक्त्युद्रे-
कः परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥ क्रतौ सुप्ते जाग्र-
त्त्वमसि फलयोगे क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ॥ अतस्त्वां संप्रेक्ष्य क्रतु-
षु फलदानप्रतिभुवं श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः ॥२०॥

यागे सुप्ते विनष्टे सति फलयोगे फलजनने च त्वं जाग्रत् त्वमेव सावधानो भवसि ॥ क्रतुमतां यागयाजिनां पुरुषाणां प्र ६२
ध्वस्तं कर्म प्रणष्टं कर्म पुरुषाराधनमृते अफलति अपितु न फलतीत्यर्थः ॥२०॥ हे स्मरहर श्मशानप्रदर्शकः मुनिः
क्रियादक्षः क्रियायां कुशलः ॥

[illegible]

भाषितन्द्वोरुरा भ्यामतं च हन्ति पाति । केसवा पा श्च मार्क विम्बा भरणां यातन्हरो किमपि वारिथस्तु सुप्रीयितो वंतये नगमयति ॥
॥२५॥ हे भगवन् यमिनो योगिनः मनोऽन्तःकारणं चित्ते स्वात्मनि सविधं आधाय समीपं कृत्वा प्रत्यक्पश्चात् अ
नर्पं ध्येयन्तिमपि अनिर्वचनीयं तत्त्वं आलोक्य हृष्टा आह्लादं दधति । धारयन्ति किं वहूतिसत्यमेतत् भवान् क
थंभूता यमिनः आत्तमरुतः आत्ता गृहीता मरुद्वायुर्यैस्ते आत्तमरुतः पुनः कथंभूताः प्रहृष्यद्रोमाणः

मनः प्रत्यक्चित्ते सविधमवधायात्त मरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ॥
।१९। यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥२५॥ ।१०।
त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च । परि
च्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥२६॥

हृष्टरोमाणः गात्राः अपरं कथंभूताः प्रमदसलिलोत्सङ्गितदृशः प्रमदसलिलानि हर्षाश्रूणि तैरुत्सङ्गिताः परिप्लुता दृष्टि
र्येषां ते तथोक्ताः के इव इत्याह अमृतमये ह्रदे निमज्ज्य आह्लादं धारयन्ति यथा कश्चित्तापार्तोऽमृतमये
सुशीतले ह्रदे निमज्ज्य आह्लादं दधाति इत्यर्थः संगतिः ॥२५॥ हे भगवन् त्वमर्कः सूर्यः त्वं सोमः चन्द्रः त्वं पवनो वायुः

[illegible]

देवुकं यन हे त्रिपुरहन्ता। आपि देवी पार्वती तां हैमवतीं समक्षं अवैनि जानाति किं कृत्वा पद्यापि उ व्याउ पं कन्दर्प

पुरा ऽ मे अन्यापक्षे ऽ सेवन्तगावन् सुखं ... कस्मात् यमनिरतदेहार्द्ध घटनात् कथं भगवान् देवो स्त्रैण

न तथा शंसा स्वरूपाभिमानिनी अहो वत् कृतिदेवे अज्ञानि स्त्रियो हरिद् भुवनयो मुग्धाः हि यो ऽ यो

ना: ॥२०॥ हे स्मरहर त्वत्प्रधाने आसमन्ताद्भावेन क्रीडात आदिशाचाः सहचराः नित्यं क्रीडाकारिणः

स्वलावण्याशंसा धृत धनुषम् न्हाय त्वयावत् पुरः स्फुटं कृष्णादतो यमनपुष्पाद्युधमपि ॥ यदि

देवी यांदेवी यम निरत देहार्द्धघटनात् अवैति त्वामधा भुवनपरे मुग्धा युवतयः ॥२०॥ स्मशाने

त्वा क्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटी परिकरः ॥ अमंगल्य

शीलं तव भवतु नामैव मखिलं तथापि स्मर्तॄणां वरद परमं मंगलमसि ॥२४॥

तथा चिताभस्मालेपः चिताभस्म ... नाम् अंगरागः तथा स्रगपि माला अपि नृकरोटी परिकरः नृ

णां कपालानि मस्तकानि तेषां निकरा ... चिन्ता ... तथापि ... स्मर्तॄणां ध्यानेन ... पूर्वोक्तप्रकारेणाप्रवि

दिना कापि विकारा द्योपस्य न लोके विकृति॰ निर्विकारमित्यर्थः॥२७॥ हे भगवन् हे देव यत् इदं तव अभिधानात्म
कं [illegible] अमुं भिन्नं अभिधानात्मकं श्रुतिर्वेदः प्रत्येकं प्रविचरति नन्विमम् अभिधानाष्टकं भवः सर्वः
उग्रः पशुपतिः अथोग्रः सहमहान् शब्देन महादेव ऽ व्यनेन तथा भीमेशानौ अमुं भिन्नं प्रत्येकं प्र
विचरति [illegible] किमर्थं अस्मै धाम्ने प्रियाय प्रीत्यर्थं हे भगवन् एवं रूपाय भगवते तुभ्यं

भवः सर्वो रुद्रः पशुपतिरथोग्रः सहमहांस्तथा भीमेशानाविति यदभिधानाष्टकमिदम्॥
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि॥ प्रियायास्मै धाम्ने प्रणिहितनमस्योस्मि भवते॥२८॥
नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः॥ नमो वर्षिष्ठाय
त्रिनयन यविष्ठाय च नमो नमः॥ सर्वस्मै ते तदिदमिति शर्वाय च नमः॥२९॥

प्रणिहितनमस्योस्मि कृतनमस्कारोस्मि॥२८॥ हे भगवन् हे प्रियदव अस्मकानां प्रियं दुनोतीति प्रियदवः तेन तुभ्यं नेदिष्ठाय
निकटवर्त्तिने नमः दविष्ठाय नमः [illegible] नमः [illegible] क्षोदिष्ठाय नमः सूक्ष्मरूपाय नमः च अन्यत् तेन
[illegible] महिष्ठाय नमः महते [illegible] पूज्याय नमः अपरं वर्षिष्ठाय [illegible] रूपाय नमः हे त्रिनयन नेयविष्ठाय

मित्रेच इतिशब्दः समाप्तौ वर्त्तते हे भगवन् परेशानाः परिपक्वमतयस्त्वयि विषये एवं पूर्वोक्तप्रकारेण परिच्छिन्ना इयत्तां
ये धाः तां इयत्तां किं येतितारं विभ्रत्तु प्रणोदहजगति यं पतत्वं न बिभ्रः यत्त्वं न भवसि यत्किंचित्सदसद्वा तत्सर्वं भ
गवानिति भगवदुक्तिरितं किंचिन्नास्ति इति तात्पर्यार्थः ॥२६॥ हे भगवन् हे स्मरारे ॐ इति पदं [illegible] गाति
लौति कथंभूतं ॐ मिति पदं समस्तं व्यस्तं समस्तव्यापकं किं कुर्वत् ॐ मिति पदं त्रयीं वेदत्रयीं अभिदधत् न केवलं त्रयीं
तिस्रो वृत्तीश्च जाग्रत्स्वप्नसुषुप्तिसमाहारभेदात् न केवलं तिस्रो वृत्तीः त्रिभुवनं स्वर्गमर्त्यपातालं च पुनः किं कुर्वत्

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥२७॥

अकाराद्यैः अकारउकारमकारैः त्रिभिर्वर्णैः त्रीनपि सुरान् ब्रह्मविष्णुरुद्रान् अभिदधत् किं कुर्वाणं ॐ
मिति पदं अणुभिः ध्वनिभिः तव तुरीयं धाम अवरुन्धानं लोकत्रयीं [illegible] किं भूतं तुरीयं धाम निरुपाधिकत्वात्
कत्वप्रापित्वात् जाग्रदवस्थाद्यावाप्तिः [illegible] नान्यादि [illegible]
थं तं सुषुप्तिवस्थाव्याप्तिः [illegible] व्याप्य [illegible] तुर्यावस्थाव्याप्तिः इति ते प

हे ईश हे स्वामिन्। असितगिरिसमं अञ्जनगिरितुल्यं कज्जलं स्यात् कस्मिंश्चित् पात्रे यदि सुरतरुशाखा लेखनी स्या
त् यदि शारदा सरस्वती उर्वीपत्रं गृहीत्वा सर्वकालं लिखति। तदपि तव गुणानां पारं न याति॥३२॥ इति श्रीमहि
म्नस्तोत्रटीकासमाप्तिः इति शुभमस्तु ॥

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी। लिखति यदि गृहीत्वा शारदा सर्व
कालं तदपि तव गुणानामीश पारं न याति॥३२॥ असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौलेर्ग्रथितगुणमहिम्नो
निर्गुणस्येश्वरस्य। सकलगणवरिष्ठः पुष्पदन्ताभिधानो रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार॥ ॥१२॥
॥१२॥ ॥३३॥ कुसुमदशननामा सर्वगन्धर्वराजः शशिधरवरमौलेर्देवदेवस्य दासः॥ स गुरुनिजम
हिम्नो भ्रष्ट एवास्य रोषात् स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः॥३४॥ सुरवरमुनिपूज्यं स्वर्गमो
क्षैकहेतुं पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः॥ व्रजति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमिद
ममोघं पुष्पदन्तप्रणीतम्॥३५॥ अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत् पठति परमभक्त्या शुद्धचे

पिछा॰

हे भगवन् विश्वोत्पत्तौ बहलरजसे प्रचुररजोगुणाधिष्ठानाय भवाय नमो नमः तत्संहारे प्रबलतमसे प्रबलतमोगुणाय हराय नमो नमः अपरं सत्त्वोत्पत्तौ सत्त्वगुणाधिष्ठाने सति जनसुखकृते जगत्संरक्षणकर्त्रे मृडाय नमो नमः ॥३०॥ हे वरद भक्तिरिति अनुनाप्रकारेण चकितं भीतं अमन्दीकृत्य मां संहृत्य चरणयोर्वाक्य

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः प्रबलतमसे तत्संहारे हराय नमो नमः ॥ जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः । प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३०॥ कृशपरिणति चेतः क्लेशवश्यं क्व चेदं क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धिः ॥ इति चकितममन्दीकृत्य मां भक्तिराधाद्वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥३१॥

पुष्पोपहारं आधात् ददाति इति किं मदीयं चेतः कृशपरिणति स्वल्पपरिणामयुक्तं पुनः कथंभूतं क्लेशवश्यं अविद्यास्मिता रागद्वेष अभिनिवेशनाः रागः सुखानुशयी द्वेषः अनुभूतादपि दुःखाद्द्वेषो अभिनिवेशः इति क्लेशाः कथं भूतो महिः गुणसीमोल्लंघिनी गुणान्याचयाति ॥३१॥

त्तः पुमान् यः ॥ स भवति शिवलोके रुद्रतुल्यस्तथात्र प्रचुरतर धनायुः कीर्तिमान् पुत्रवांश्च ॥३४॥ महे
शान्नापरो देवो महिम्नो नापरा स्तुतिः ॥ अघोरान्नापरो मंत्रो नास्ति तत्त्वं गुरोः परम् ॥३५॥ श्रीपुष्प
दन्तमुखपंकजनिर्गतेन ॥ स्तोत्रेण किल्बिषहरेण हरप्रियेण कंठस्थितेन पठितेन समाहि
23 तेन सुप्रीणितो भवति भूतपतिर्महेशः ॥३८॥ समाप्तमिदं स्तोत्रं सर्वमीश्वरवर्णनम् ॥ अनू
पमं मनोहारि पुण्यं गन्धर्वभाषितम् ॥३९॥ दीक्षा दानं तपस्तीर्थं होमयोगादिकाः क्रियाः ॥ महिम्न ॥१७॥
॥१७॥ स्तव पाठस्य कलां नार्हन्ति षोडशीम् ॥४०॥ इति श्रीपुष्पदन्तगन्धर्वराजविरचितं महिम्नस्तोत्रं
संपूर्णं शुभमस्तु शुभं भूयात् श्रावणमासे कृष्णपक्षे अधिमासे पंचम्यां शुक्रवासरे लि
खितमिदं लोहिय जगन्नाथशर्मणा ॥

०॰ महिम्नस्तोत्रंसमाप्तम् ॰०

५४